Click here to go back



|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

**अथ चंद्र कवचं>**

**ओं अस्य श्री चंद्र कवच महामंत्रस्य गौतम ऋषिः। गायत्री छंदः। सोमो देवता। रं बीजं। सं शक्तिः। ओं कीलकं। मम सोमग्रह प्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) वां अंगुष्ठाभ्यां नमः। वीं तर्जनीभ्यां नमः। वों मध्यमाभ्यां नमः। वैं अनामिकाभ्यां नमः। वौं कनिष्ठिकाभ्यां नमः। वः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) वां हृदयाय नमः। वीं शिरसे स्वाहा। वों शिखायै वषट्। वैं कवचाय हुं। वौं नेत्रत्रयाय वौषट्। वः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) सोमं द्विभुजपद्मं च शुक्लांबरधरंशुभं। श्वेतगंधानुलेपनं च मुक्ताभरणभूषणं। श्वेताश्वरथमारूढं मेरुं चैव प्रदक्षिणं। सोमं चतुर्भुजं देवं केयूर मकुटोज्वलं। वासुदेवस्य नयनं शंकरस्य च भूषणं। एवं ध्यात्वा जपेन्नित्यं चंद्रस्य कवचं मुदा॥ (अथ कवचं) शशी पातु शिरोदेशं फालं पातु कलानिधिः। चक्षुषी चंद्रमाः पातु शृतिं पातु कलात्मकः। घ्राणं पक्षकरः पातु मुखं कुमुदबांधवः। सोमः करौ तु मे पातु स्कंधौ पातु सुधात्मजः॥ ऊरू त्रिजनिः पातु मध्यं पातु निशाकरः। कटिं सुधाकरः पातु उरः पातु शशिधरः। मृगांको जानुनी पातु जंघे पातु मृताब्दिजः। पादौ हिमकरः पातु चंद्रोखिलं वपुः॥ एतद्दि कवचं पुण्यं भुक्ति मुक्ति प्रदायकं। यः पठेच्छ्रुणुयाद्वापि सर्वत्र विजयी भवेत्॥ इति श्रीब्रह्मवैवर्ते महापुराणे उत्तरखंडे चंद्रकवचं॥**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back